दैत्यानामधिपेश्वरः ॥२८३॥ पादाक्रान्त्यान्नतभुवं किरीटो
ल्लिखिताम्बराम् । क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन-
ताम् ॥२८४॥ छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे ।
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ॥२८५॥
दिशोभुजसहस्रेण समन्ताद्व्याप्य संस्थिताम् । ततः प्रव-
वृते युद्धं तया देव्याः सुरद्विषाम् ॥२८६॥ ततः शरशतैर्देवी

माच्छादयत सोऽसुरः । सापितत्कुपिता देवी धनुश्चिच्छेद
चेषुभिः ॥२८७॥ शस्त्रास्त्रैर्बहुधामुक्तैरार्दिपत दिगन्तरम् ।
महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ॥ २८८ ॥ मुक्तानि
तेन चास्त्राणि दिव्यानि परमेश्वरी । बभञ्ज लीलयैवोग्र
हुङ्कारोच्चारणादिभिः ॥२८९ ॥ युयुधेः चामरश्चान्यैश्चतुरङ्ग-
बलान्वितः । रथानामयुतैः षड्भिरुदग्राख्यो महासुरः
॥ २९० ॥ दिव्यान्यस्त्राणि शतशो मुमुचेयान्यथाम्बिका ।
बभञ्ज तानि दैत्येन्द्रस्तत् प्रतीघातकर्तृभिः ॥१९१। अयु-
ध्यतायुतानाञ्च सहस्रेण महाहनुः। पञ्चाशद्भिश्च नियुतैरसि-

लोमा महासुरः ॥ २९२ ॥ शर वर्षैं शितैः शस्त्रैस्तथास्त्रश्चैव
दारुणैः। तयोर्युद्धमभूद्भूयः सर्वलोकभयंकरम् ॥२९३॥ अयु-
तानां शतैः षड्भिर्वाष्कलो युयुधेरणे । गजवाजिसहस्रौघैर- प्रति
नेकैः परिवारितः ।२९४। ततः प्रववृते युद्धं देव्याःशुम्भस्य
चोभयोः । पश्यतां सर्वदेवानामसुराणां च दारुणम् ॥२९५॥ लोम
वृतो रथानाङ्कोट्या च युद्धे तस्मिन्नयुध्यत । विडालाख्यो-
ऽयुतानाञ्च पञ्चाशद्भिरथायुतैः ।२९६। ऋषिरुवाच ॥२९७॥ दुर्गा
युयुधे संयुगे तत्र रथानां परिवारितः । अन्ये च तत्रायुतशो
रथनागहयैर्वृताः ॥१९८ ॥ अहं विभूत्या बहुभिरिह रूपै- ७४

यंदा स्थिता । तत्संहृतं मयैकैव तिष्ठम्याजौ स्थिरोभव
॥ २९९ ॥ युयुधुस्संयुतेदेव्या सहतत्र महासुराः । कोटि
कोटि सहस्त्रैस्तुरथानान्दन्तिनान्तथा ॥ ३०० ॥ देव्युवाच
॥३०१॥ हयानांच वृतोयुद्धे तत्राभून् महिषासुरः । तोमरै-
भिंन्दिपालैश्च शक्तिभिर्मुसलैस्तथा ।३०२। ततः समस्ता-
स्ता देव्यो ब्रह्माणी प्रमुखालयम् । तस्या देव्यास्तनौ जग्मु-
रेकैवासीत्तदाम्बिका ।३०३। युयुधुस्संयुगे देव्या खड्गैः परशु
पट्टिशैः । केचिच्चचिक्षपुश्शक्तीः केचित्पाशांस्तथापरे ॥३०४॥
एकैवाहं जगत्यत्र द्वितीया का ममापरा । पश्यैता दुष्ट

मय्यैव विशन्त्यो मद्विभूतयः ॥३०५॥ देवी खंगप्रहारैस्तुते-
तांहन्तुम्प्रचक्रमुः। सापि देवी ततस्तानि शस्त्राण्यस्त्राणि
चण्डिका ॥ ३०६ ॥ देव्युवाच।३०७। लीलयैव प्रचिच्छेद प्रति
निज शस्त्रास्त्र वर्षिणी। अनायस्ताननादेवीस्तूयमानासुर-
र्षिभिः ॥ ३०८॥ बलावले पादुष्टे त्वं मा दुर्गे गर्वमावह। लोम
अन्यासांबलमाश्रित्य युध्यसे याति मानिनी ॥ ३०९ ॥
मुमोचा सुरदेहेषुशस्त्राण्यस्त्राणि चेश्वरी। सोऽपिक्रुद्धो धुत- दुर्गा
सटोदेव्या वाहन केशरी। ३१०। निशुम्भं निहतं दृष्ट्वा
भ्रातरं प्राण सम्मितम्। हन्यमानं बलंचैव शुम्भः ७६

क्रुद्धोऽब्रवीद्वचः ॥३११॥ चचारा सुरसैन्येषु वनेष्विव हुता-
शनः । निश्वसान्मुमुचेयांश्च युध्यमानारणेम्बिका ॥३१२॥
ऋषिरुवाच ।३१३। त एवसद्यस्सम्भूता गणाःशत सहस्रशः। प्रति
युयुधुस्तेपरशुभिः भिंदिपालासिपट्टिशैः ॥३१४॥ केचिद्विने
शुर सुराः केचिन्नष्टा महाहवात् । भक्षिताश्चापरेकाली शिव- लोन
दूती मृगाधिपैः । ३१५ । नाशयन्तोऽसुरगणान्देवी शक्त्यु-
बृंहिताः । अवादयन्त पटहान् गणाः शङ्खास्तथा परे दुर्गा
॥३१६॥ खण्डं खण्डं च चक्रेण वैष्णव्या दानवाः कृताः
वज्रेण चैन्द्रीहस्ताग्र विमुक्तेन तथापरे ॥३१७॥ मृदंगाश्च-

तथैवान्ये तस्मिन्युद्धमहोत्सवे । ततोदेवी त्रिशूलेन गदया
शक्तिवृष्टिभिः ॥३१८॥ माहेश्वरी त्रिशूलेन भिन्नापेतुस्तथा-
परे । वाराही तुण्डघातेनकेचिच्चूर्णीकृताभुवि । ३१९।खंगा- प्रति
दिभिश्चशतशोनिजघानमहासुरान् । पातयामास चैवान्यान्
घण्टास्वनविमोहितान् ॥ ३२० ॥ कौमारीशक्तिनिर्भिन्नाः लोम
केचिन्नेशुर्महासुराः । ब्रह्माणी मन्त्रपूतेन तोयेनान्येनिरा
कृताः ॥३२१॥ असुरान्भुविपाशेन बद्ध्वाचान्यानकर्षयत् । दुर्गा
केचिद्द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथापरे ।३२२। ततः
सिंहश्चखादौग्रं दंष्ट्राक्षुण्णशिरोधरान् ।असुरांस्तांस्तथाकाली ७८

शिवदूती तथापरान् ॥३२३॥ विपोथिता निपातेन गदया-
भुवि शेरते । वेमुश्च केचिद्रुधिरं मुशलेन भृशंहताः ।३२४।
तस्य निष्कामतो देवी प्रहस्य स्वनवत्ततः । शिरश्चि- प्रति
च्छेद खंगेन ततोऽसावपतद्भुवि । ३२५ । केचिन्निपतिता
भूमौभिन्नाः शूलेन वक्षसि । निरन्तराः शरौघेण कृता लोम
केचिद्रणाजिरे ॥ ३२६ ॥ भिन्नस्य तस्य शूलेन हृद-
यान्निः सृतोऽपरः । महाबलो महावीर्यः तिष्ठेति पुरुषो दुर्गा
वदन् । ३२७ । श्येनानुकारिणः प्राणान्मुमुचुस्त्रिदशार्दनाः । ७६
केषाञ्चिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे ॥३२८॥ शूलहस्तं

समायान्तं निशुम्भममरार्दनम् । हृदि विव्याध शूलेन
वेगाविद्धेन चण्डिका । ३२९ । शिरांसि पेतुरन्येषामन्ये
मध्ये विदारिताः । विच्छिन्न जङ्घास्त्वपरेपेतुर्व्याम्महासुराः प्रति
॥ ३३० ॥ तस्यापतत एवाशु गदाश्चिच्छेद चण्डिका ।
खड्गेन शितधारेण स च शूलं समाददे ॥३३१॥ एकबाह्व- लोम
क्षिचरणाः केचिद्देव्या द्विधाकृताः । छिन्नेऽपि चान्ये
शिरसि पतिताः पुनरुत्थिताः ।३३३। ततो निशुम्भो वेगेन दुर्गा
गदामादाय चण्डिकाम् । अभ्यधावत वै हन्तुं दैत्यसेना-
समावृतः ॥३३४॥ कबन्धाः युयुधुर्देव्याः गृहीत परमायुधाः । ८०

ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः ॥३३४॥ ततो भग-
वती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी । चिच्छेद तानि प्रति
चक्राणि स्वशरैस्सायकांश्चतान् ॥ ३३५ ॥ कबन्धाश्छिन्न
शिरसः खंगशक्त्यष्टिपाणयः । तिष्ठ तिष्ठेति भाषन्तो देवी लोम
मन्ये महासुराः ॥ ३३६ ॥ पुनश्च कृत्वाबाहूनामयुतं दनुजे-
श्वरः । चक्रायुधेन दितिजश्छादयामास चण्डिकाम् ॥३३७॥ दुर्गा
पातितैरथनागाश्वैरसुरैश्च वसुन्धरा । अगम्या सा भवत्तत्र
यत्राभूत्स महारणः ॥३३८॥ ततो निःशुम्भस्सम्प्राप्यचेतना ८१
मात्तकार्मुकः । आजघान शरैर्देवीं कालीं केसरिणं तथा ६

॥ ३३९ ॥ शोणितौघा महानद्यः सद्यस्तत्र प्रसुस्रुवुः । मध्ये चासुरसैन्यस्यं वारणासुरवाजिनाम् ॥ ३४० ॥ ततः सा चण्डिका क्रुद्धा शूलेनाभिजघानतम् । स तदाभिहतो भूमौ मूर्छितो निपपात ह ॥ ३४१॥ क्षणेन तन्महासैन्यमसुराणां तथाम्बिका । निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम् ॥३४२॥ शुम्भमुक्ताञ्छरान्देवी शुम्भस्तत्प्रहिताञ्छरान् । चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रसः ॥ ३४३ ॥ स च सिंहो महानादमुत्सृजन्धुतकेसरः । शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ॥ ३४४ ॥ सिंहनादेन शुम्भस्य

प्रति

लोम

दुर्गा

८२

व्याप्तं लोकत्रयान्तरम् । निर्घातनिःस्वनो घोरोजितवान-
वनीपते ॥ ३४५ ॥ देव्यागणैश्चतैस्तत्रकृतं युद्धंमहासुरैः ।
यथैषांतुतुषुर्देवाः पुष्पवृष्टिमुचोदिवि ॥३४६॥ शुम्भेनागत्य प्रति
या शक्तिर्मुक्ता ज्वालातिभीषणा । आयान्ती वह्निकूटाभा
सा निरस्ता महोल्कया ॥३४७॥ ऋषिरुवाच ।३४८ । दुरा- लीम
त्मंस्तिष्ठतिष्ठेति व्याजहाराम्बिका यदा । तदा जयेत्यभि-
हितं देवैराकाशसंस्थितैः ॥३४९॥ निहन्यमानं तत्सैन्यमव- दुर्गा
लोक्य महासुरः । सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथा-
म्बिकाम् ॥३५०॥ अट्टाट्टहासमशिवं शिवदूती चकार ह । ८३

तैश्शब्दैरसुरास्त्रेसु शुम्भः कोपं परं ययौ ॥३५१॥ स देवीं
शरवर्षेण ववर्ष समरेऽसुरः । यथा मेरुगिरेः शृङ्गन्तोयवर्षेण
तोयदः ॥ ३५२ ॥ ततः काली समुत्पत्य गगनं क्ष्मामताड- प्रति
यत् । कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः।३५३।
तस्य छित्वा ततो देवी लीययैव शरोत्करान् । जघान तुर- लोम
गान्बाणैर्यन्तारंचैव वाजिनाम् ।३५४। ततः सिंहो महाना-
दैस्त्याजितेभ महामदैः । पूरयामास गगनं गां तथोपदि- दुर्गा
शोदश ॥३५५॥ चिच्छेद च धनुः सद्योध्वजञ्चातिसमुच्छ्रि-
तम् । विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः ॥३५६॥ ८४

पूरयामास ककुभो निजघण्टास्वनेनच। समस्तदैत्यसैन्यानां
तेजोवधविधायिना ।३५७। सच्छिन्नधन्वा विरथो हताश्वो
हतसारथिः । अभ्यधावत तां देवीं खंगचर्मधरोऽसुरः
॥३५८॥ तमायान्तं समालोक्य देवी शङ्खमवादयत् । ज्या-
शब्दञ्चापि धनुश्चकारातीवदुःसहम् ॥ ३५९ ॥ सिंहमाहत्य
खड्गेन तीक्ष्णधारेण मूर्द्धनि । आजघान भुजे सव्ये देवी-
मप्यतिवेगवान् ।३६०। सरथस्थस्तथत्युच्चैर्गृहीतपरमायुधैः।
भुजैरष्टाभिरतुलैर्व्याप्याशेषम्बभौनभः।३६१।तस्या खड्गो-
भुजम्प्राप्यपफालनृपनन्दन । ततो जग्राह शूलं स कोपा-

दरुणलोचनः॥३६२॥ तस्मिन्निपतिते भूमौ निशुम्भे भीम
विक्रमे । भ्रातर्यतीवसंक्रुद्धः प्रययौ हन्तुमम्बिकाम्॥३६३॥
चिक्षेप च ततस्तत्तु भद्रकाल्याम्महासुरः । जाज्वल्यमा-
नन्तेजोभी रविबिम्बमिवाम्बरात् ॥ ३६४ ॥ ततः
परशुहस्तं तमायान्तं दैत्यपुंगवम् । आहत्य देवी बाणौ-
घैरपातयत भूतले॥३६५॥दृष्ट्वा तदापतच्छूलं देवी शूल-
ममुञ्चत । तच्छूलं शतधा तेन नीतं सच महासुरः ॥३६६॥
अविध्याथ गदां सोपि चिक्षेप चण्डिकां प्रति । सापि देव्या
त्रिशूलेन भिन्ना भस्मत्वमागता ॥३६७॥ हते तस्मिन्महा-

वीर्यै महिषस्य चमूपतौ । आजगाम गजारूढश्चामरस्त्रि-
दशार्दनः ॥ ३६८॥ कोपाध्मातो निशुम्भोऽथ शूलं जग्राह
दानवः । आयान्तम्मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ३६९। प्रति
सोऽपिशक्तिम्मुमोचाथ देव्यास्तामम्बिकाद्रुतम् । हुङ्काराभि-
हताम्भूमौ पातयास निष्प्रभाम् ॥ ३७० ॥ छिन्ने चर्मणि लोम
खड्गे च शक्तिंचिक्षेप सोऽसुरः । तामप्यस्य द्विधाचक्रे
चक्रेणाभिमुखागताम् ॥३७१॥ भग्नां शक्तिं निपतितां दृष्ट्वा दुर्गा
क्रोधसमन्वितः । चिक्षेप चामरः शूलम्बाणैस्तदपि साच्छि-
नत् ॥ ३७२ ॥ ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमम् । ८७

निशुम्भस्याशु चिच्छेद चर्म चाप्यष्टचन्द्रकम् ॥३७३॥ ततः
सिंहोसमुत्पत्य गजकुम्भान्तरे स्थितः बाहुयुद्धेन युयुधे
तेनोच्चैस्त्रिदशारिणा ॥३७४॥ निशुम्भो निहितं खड्गचर्म प्रति
चादाय सुप्रभम् । अताड़यन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम्
॥३७५॥ युद्ध्यमानौ ततःस्तौ तुतस्मान्नागान्महींगतौ । लोम
युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः ॥ ३७६ ॥ चिच्छेदा
ताञ्छरांस्ताभ्यां चण्डिका स्वशरोत्करैः । ताडयामास दुर्गा
चांगेषुशस्त्रौघैरसुरेश्वरौ ॥३७७॥ ततो वेगात्समुत्पत्य निपत्य
च मृगारिणा। करप्रहारेण शिरश्चामरस्य पृथक्कृतम्॥३७८॥ ८८

ततो युद्धमतीवासीद्देव्याशुम्भनिशुम्भयोः । शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ॥३७९॥ उदग्रश्च रणे देव्याः शिलावृक्षादिभिर्हतः । दन्तमुष्टितलैश्चैव करालश्च निपातितः ॥३८०॥ आजगाम महावीर्यःशुम्भोऽपि स्वबलैर्वृतः । निहन्तुं चण्डिकां कोपात्कृत्वा युद्धं तु मातृभिः ॥३८१॥ देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् । वाष्कलम्भिन्दिपालेन बाणैस्ताम्रं तथान्धकम् ॥३८२॥ तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः । सन्दष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ॥३८३॥ उग्रास्यमुग्रवीर्यञ्च तथैव च महाहनुम् ।

त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ॥३८४॥ हन्यमान-
म्महासैन्यं विलोक्यामर्षमुद्वहन् । अभ्यधावन्निशुम्भोऽथ
मुख्यया सुरसेनया ॥३८५॥ बिडालस्यासिना कायात्पा- प्रति
तयामास वै शिरः । दुर्धरं दुर्म्मुखञ्चोभौ शरैर्निन्ये यमक्ष-
यम् ॥३८६॥ चकार कोपमतुलं रक्तबीजे निपातिते । लोम
शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ॥३८७। एवं
संक्षीयमाणे तु स्वसैन्ये महिषासुरः । माहिषेण स्वरूपेण दुर्गा
त्रासयामास तान्गणान् ॥३८८॥ ऋषिरुवाच ॥३८९॥
कांश्चित्तुण्डप्रहारेण खुरक्षेपैस्तथापरान् । लाङ्गूलताडितां- ६०

श्चान्याञ्छृङ्गाभ्याञ्च विदारितान् ॥३९०॥ भूयश्चेच्छाम्यहं
श्रोतुं रक्तबीजे निपातिते । चकार शुम्भो यत्कर्म निशुम्भ-
श्चातिकोपनः ॥३९१॥ वेगेन कांश्चिदपरान्नादेन भ्रमणेन प्रति
च । निःश्वासपवनान्यान्पातयामास भूतले ॥३९२॥
विचित्रमिदमाख्यातं भगवन्भवता मम । देव्याश्चरित- लोम
माहात्म्यं रक्तबीजवधाश्रितम् ॥३९३॥ निपात्य प्रमथानी-
कमभ्यधावत सोऽसुरः । सिंहं हन्तुमहादेव्याः कोपञ्चक्रे दुर्गा
ततोऽम्बिका ॥३९४॥ राजोवाच ॥३९५॥ सोऽपि कोपा-
न्महावीर्यः खुरक्षुण्णमहीतलः । शृङ्गाभ्यांपर्वतानुच्चांश्चि- ६१

क्षेप च ननाद च ॥३९६॥ तेषांमातृगणो जातो ननर्ता
सृङ्मदोद्धतः ॥३९७॥ वेगभ्रमणविक्षुण्णा मही तस्य व्य-
शीर्यत । लाङ्गूलेनाहताश्चाब्धिः प्लावयामास सर्वतः प्रति
॥३९८॥ नीरक्तश्च महीपालरक्तबीजो महासुरः । ततस्ते
हर्षमतुलमवापुस्त्रिदशाः नृप ॥३९९॥ धुतशृङ्गविभिनाश्च- लोम
खण्डं खण्डं ययुर्घनाः । श्वासानिलास्ताः शतशो निपेते-
र्नभसोऽचलाः ॥४००॥ जघान रक्तबीजं तं चामुण्डा पीत- दुर्गा
शोणितम् । स पपात मही पृष्ठे शस्त्रसंघसमाहतः ॥४०१॥
इति क्रोधसमाध्मातमापतन्तं महासुरम् । दृष्ट्वा सा ६२

चण्डिका कोपं तद्वधायतदाकरोत् ॥४०२॥ तांश्चखादाथ
चामुंडा पपौ तस्य च शोणितम् । देवी शूलेन वज्रेण
बाणैरसिभिर्ऋष्टिभिः ॥४०३॥ सा क्षिप्त्वा तस्य वै पाशं तं
बबन्ध महासुरम् । तत्याज महिषं रूपं सोपि बद्धो महा-
मृधे ॥४०४॥ यतस्ततस्तद्वक्त्रेण चामुंडा सम्प्रतीच्छति ।
मुखे समुद्गता येऽस्यारक्तपातान्महासुराः ॥४०५॥ ततः
सिंहोऽभवत्सद्यो यावत्तस्याम्बिका शिरः । छिनत्ति तावत्पु-
रुषः खड्गःपाणिरदृश्यत ॥४०६॥ न चास्या वेदनांचक्रे
गदापातोऽल्पिकामपि । तस्याहतस्य देहात्तु बहु सुस्राव

शोणितम् ॥४०७॥ तत एवाशु पुरुषं देवी चिच्छेद सायकैः ।
तंखड्गचर्मणा साधं ततः सोऽभून्महागजः ॥४०८॥ मुखेन
काली जगृहे रक्तबीजस्य शोणितम् । ततोऽसावाजघानाथ
गदया तत्र चंडिकाम् ॥४०९॥ करेण च महासिंहं तञ्चकर्ष
जगर्ज च । कर्षतस्तु करं देवी खड्गेन निरकृन्तत ॥४१०॥
भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे । इत्युक्त्वा
तांततो देवी शूलेनाभिजघानतम् ॥४११॥ ततो महासुरो
भूयो माहिषं वपुरास्थितः । तयैव क्षोभयामास त्रैलोक्यं
सचराचरम् ॥४१२॥ भक्षयन्ती चरणे तदुत्पन्नान्महासुरान् ।

एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥४१३॥ ततः क्रुद्धा
जगन्माता चंडिका पानमुत्तमम्। पपौ पुनः पुनश्चैव जहा-
सारुणलोचना ॥४१४॥ मच्छस्त्रपातसम्भूतान् रक्तबिन्दू- प्रति
न्महासुरान्। रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना
॥४१५॥ ननर्द चासुरः सोऽपि बलवीर्यमदोद्धृतः। विषाणा लोम
भ्यांश्च चिक्षेप चंडिकां प्रति भूधरान् ॥४१६॥ तान्विषण-
णान् सुरान् दृष्ट्वा चंडिका प्राह सत्वरा। उवाच कालीं दुर्गा
चामुंडे विस्तीर्णं वदनं कुरु ॥४१७॥ सा चा तान् प्रहितां-
स्तेन चूर्णयन्ती शरोत्करैः। उवाच तन्मदोद्धूतमुखरागा-

कुलाक्षरम् ॥४१८॥ तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत् ।
व्याप्तमासीत्ततो देवा भयामाजग्मुरुत्तमम् ॥४१९॥ देव्यु-
वाच ॥४२०॥ तस्या हतस्य बहुधा शक्तिशूलादिभिर्भुवि । प्रति
पपातयो वै रक्तौघस्तेनासञ्छतशोऽसुराः ॥४२१॥ गर्ज गर्ज
क्षणम्मूढ मधुयावत्पिवाम्यहम् । मया त्वयि हतेऽत्रैव गर्जि- लोम
ष्यन्त्याशु देवताः ॥४२२॥ स चापि गदया दैत्यः सर्वा
एवाहनत् पृथक् । मातृः कोप समाविष्टो रक्तबीजो महा- दुर्गा
सुरः ॥४२३॥ ऋषिरुवाच ॥४२४॥ शक्त्या जघान कौमारी
वाराही च तथासिना । माहेश्वरी त्रिशूलेन रक्तबीजंमहा- ६६

सुरम् ॥४२५॥ एवमुक्त्वा समुत्पत्य साऽऽरूढा तं महासुरम् ।
पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत् ॥४२६॥ वैष्णवी
चक्रभिन्नस्य रुधिरस्राव सम्भवैः । सहस्रशोजगद्व्याप्तं प्रति
तत्प्रमाणर्महासुरैः ॥४२७॥ ततः सोऽपि पदाक्रान्तस्तया
निजमुखात्ततः । अर्धनिष्क्रान्त एवासीद्देव्या वीर्येण संवृतः लोम
॥४२८॥ वैष्णवी समरे चैनं चक्रेणाभिजघान ह । गदया
ताडयामास ऐन्द्री तमसुरेश्वरम् ॥४२९॥ अर्धनिष्क्रान्त दुर्गा
एवासौ युध्यमानो महासुरः । तया महासिना देव्याशिर-
श्छित्वा निपातितः ॥ ४३० ॥ पुनश्च वज्रपातेन ९७
क्षतमस्य शिरो यदा । ववाह रक्तं पुरुषास्ततो जाताः ७

सहस्रशः ॥४३१॥ ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत्। प्रहर्षञ्च परं जग्मुः सकला देवतागणाः ॥४३२॥ ते चापि युयुधुस्तत्र पुरुषाः रक्तसम्भवाः। समं मातृभिरत्युग्र शस्त्रपातातिभीषणम् ॥४३३॥ तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभि। जगुर्गंधर्वपतयो ननृतुश्चाप्सरो गणाः ॥४३४॥ यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः। तावन्तः पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥४३५॥ ऋषिरुवाच ॥४३६॥ कुलिशेनाहतस्याशु बहु सुस्राव शोणितम्। समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥४३७॥ शक्रादयः सुर-

गणानिहतेऽतिवीर्यें तस्मिन् दुरात्मनि सुराबिले च देव्या ।
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसाः वाग्भिः प्रहर्षपुलकोद्गम-
चारुदेहाः ॥४३८॥ युयुधे स गदापाणिरिन्द्रशक्त्या महा- प्रति
सुरः । ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत् ॥४३९॥
देव्या यया ततमिदं जगदात्मशक्त्या निःशेषदेवगणशक्ति- लोम
समूहमूर्त्या । तामम्बिकामखिल देवमहर्षिपूज्यां भक्त्या
नताःस्म विदधातु शुभानि सा नः ॥४४०॥ रक्तबिन्दुर्यदा दुर्गा
भूमौ पयत्यस्य शरीरतः । समुत्पतति मेदिन्य तत्प्रमाण-
स्तदासुरः ॥४४२॥ यस्याः प्रभावमतुलम्भगवाननन्तो ब्रह्मा ६६

हरश्च न हि वक्तुमलम्बलञ्च । सा चण्डिकाखिलजगत्परि-
पालनाय नाशाय चाशुभभयस्य मतिंकरोतु ॥४४२॥ पला-
यनपरान् दृष्ट्वा दैत्यान् मातृगणार्दितान्। योद्धुमभ्याययौ- प्रति
क्रुद्धोरक्तबीजो महासुरः ॥४४३॥ या श्रीः स्वयं सुकृतिनां
भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः। लोम
श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताःस्म परि-
पालय देवि विश्वम् ॥४४४॥ इति मातृगणं क्रुद्धं मर्द- दुर्गा
यन्तम्महासुरान् । दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्द्देवारिसैनिकाः
॥४४५॥ किं वर्णयाम तव रूपमचिन्त्यमेतत् किं चाति- १००

वीर्यमसुरक्षयकारि भूरि । किंचाहवेषु चरितानि तवाद्भु-
तानि सर्वेषु देव्यसुरदेवगणादिकेषु ॥४४६॥ चण्डाट्टहासैर-
सुराः शिवदूत्यभिदूषिताः । पेतुः पृथिव्याम्पतितांस्तांश्च-
खादाथ सा तदा ॥४४७॥ हेतुः समस्तजगतां त्रिगुणापि
दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा । सर्वाश्रयाखिलमिदं
जगदंशभूत मव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥४४८॥
नखैर्विदारितांश्चान्यान्भक्षयन्ती महासुरान् । नारसिंही
चचाराजौ नादापूर्णदिगम्बरा ॥४४९॥ यस्याः समस्तसुरता-
समुदीरणेन तृप्तिम्प्रयाति सकलेषु मखेषु देवि । स्वाहासि

वै पितृगणस्यचतृप्तिहेतु रुच्चार्यसे त्वमत एव जनैः स्वधा
च ॥४५०॥ तुण्डप्रहारविध्वस्ता दन्ष्ट्राग्रक्षतवक्षसः। वाराह-
मूर्त्यां न्यपतंश्चक्रेण च विदारिताः ॥४५१॥ या मुक्तिहेतु-
र्विचिन्त्य महाव्रता त्वमभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः।
मोक्षार्थिभिर्मुनिभिरस्त समस्तदोषैर्विद्यासि सा भगवती
परमा हि देवि ॥४५२॥ ऐन्द्री कुलिशपातेन शतशोदैत्य
दानवाः। पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ॥४५३॥
शब्दात्मिकासुविमलर्ग्यजुषानिधान मुद्गीथरम्यपदपाठवतां
च साम्नाम। देवी त्रयी भगवती भवभावनाय वार्ता च

प्रति

लोम

दुर्गा

१०२

सर्वंजगतां परमार्तिहन्त्री ॥४५४॥ माहेश्वरी त्रिशूलेन तथा
चक्रेण वैष्णवी । दैत्याञ्जघान कौमारी तथा शक्त्याति-
कोपना ॥४५५॥ मेधासि देवि विदिताखिलशास्त्रसारा प्रति
दुर्गासि दुर्गभवसागरनौरसङ्गा । श्रीः कैटभारिहृदयैक-
कृताधिवासा गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥४५६॥ लोम
कमण्डलुजलाक्षेपहतवीर्यान्हतौजसः । ब्रह्माणी चाकरोच्छ-
त्रून्येन येन स्म धावति ॥४५७॥ ईषत्सहासममलं परिपूर्ण- दुर्गा
चन्द्रबिम्बानुकारि कनकोत्तमकान्तिकान्तम् । अत्यद्भुत- १०३
म्प्रहृतमात्तरुषा तथापि वक्त्रं विलोक्य सहसा महिषासुरेण

॥४५८॥ तस्याग्रतस्तथा काली शूलपातविदारितान्।
खाट्वाङ्गपोथितांश्चारीन्कुर्वंती व्यचरत्तदा ॥४५९॥ दृष्ट्वा
तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशाङ्कसदृशच्छवि यन्न प्रति
सद्यः। प्राणान्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि
कुपितान्तकदर्शनेन ॥४६०॥ सा च तान्प्रहितान्वाणाञ्छूल लोम
शक्तिपरश्वधान्। चिच्छेद लीलयाध्मातधनुर्म्मुक्तैर्महेषुभिः
॥४६१॥ देवि प्रसीद परमा भवती भवाय सद्यो विनाश- दुर्गा
यसि कोपवती कुलानि। विज्ञातमेतदधुनैव यदस्तमेत-
न्नीतंबलं सुविपुलम्महिषासुरस्य॥४६२॥ ततः प्रथममेवाग्रे १०४

शरशक्त्युष्टिवृष्टिभिः । ववर्षुरुद्धतामर्षास्तां देवीममरारयः
॥४६३॥ ते सम्मता जनपदेषुधनानि तेषान्तेषां यशांसि
न च सीदति धर्मवर्गः । धन्यास्त एव निभृतात्मजभृत्य- प्रति
दारा येषां सदाभ्युदयदा भवती प्रसन्ना ॥४६४॥ तेऽपि
श्रुत्वावचो देव्याः शर्वाख्यातम्महासुराः । अमर्षापूरिता लोम
जग्मुर्यत्र कात्यायनी स्थिता ॥४६५॥ धर्म्याणि देवि
सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति । दुर्गा
स्वर्गं प्रयाति च ततो भवती प्रसादाल्लोकत्रयेऽपि फलदा
ननुदेवि तेन ॥४६६॥ यतो नियुक्तो दौत्येन तया देव्या

शिवः स्वयम् । शिवदूतीति लोकेस्मिंस्ततः सा ख्याति-
मागता ॥४६७॥ दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः
स्मृता मतिमतीव शुभां ददासि । दारिद्र्यदुःखभयहारिणि प्रति
का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ॥४६८। बला
वलेपादथचेद्भवन्तो युद्धकांक्षिणः । तदागच्छत तृप्यन्तु लोन
मच्छिवाः पिशितेन वा ॥४६९॥ एभिर्हतैर्जगदुपैति सुख-
मत्तथैते कुर्वन्तु नाम नरकाय चिराय पापम् । संग्राममृत्यु- दुर्गा
मधिगम्य दिवम्प्रयान्तु मत्वेति नूनमहितान्विनिहंसि
देवि ॥४७०॥ त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः । १०६

यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥४७१॥ दृष्ट्वैव
किंन भवती प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहिणोऽषि
शस्त्रम् । लोकान्प्रयान्तु रिपवोऽपि हि शस्त्रपूता इत्थम्मति- प्रति
र्भवति तेष्वपि तेऽतिसाध्वी ॥४७२॥ ब्रूहि शुम्भं निशुम्भं
च दानवावतिगर्वितौ । ये चान्ये दानवास्तत्र युद्धाय समु- लोम
पस्थिताः ॥४७३॥ खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शूला-
ग्रकान्ति निवहेन दृशोऽसुराणाम् । यन्नागताविलयमंशु- दुर्गा
मदिन्दुखण्ड योग्यानंतव विलोकयतांतदेतत् ॥४७४॥ १०७
सा चाह धूम्रजटिल मीशानमपराजिता । दूत त्वं गच्छ

भगवन् पार्श्वं शुम्भ निशुम्भयोः ॥४७५॥ दुर्वृत्तवृत्तशमनं
तव देवि शीलं रूपं तथैतदविचिन्त्यमतुल्य मन्यैः। वीर्यं
च हन्तृहृतदेवपराक्रमाणां वैरिष्वपि प्रकटितैव दया त्वये- प्रति
त्थम् ॥४७६॥ ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा।
चण्डिकाशक्तिरत्युग्रा शिवा शतनिनादिनी ॥४७७॥ केनो- लोम
पमा भवतु तेऽस्य पराक्रमस्य रूपं च शत्रुभयकार्यतिहारि-
कुत्र। चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे दुर्गा
भुवनत्रयेऽपि ॥४७८॥ ततः परिवृतस्ताभिरीशानो देव-
शक्तिभिः। हन्यन्तामसुराः शीघ्रं मम प्रीत्याऽह चण्डिकाम् १०८

॥४७९॥ त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समर-
मूर्द्धनि तेपि हत्वा। नीता दिवं रिपुगणा भयमप्यपास्तमस्मा-
कमुन्मदसुरारिभवं नमस्ते ॥४८०॥ वज्रहस्ता तथैवैन्द्री
गजराजोपरिस्थिता। प्राप्ता सहस्र नयना यथा शक्रस्त-
थैवसा ॥४८१॥ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके।
घटास्वनेन नः पाहिचापज्यानिःस्वनेन च ॥४८२॥ नार-
सिंहीं नृसिंहस्य बिभ्रती सदृशं वपुः। प्राप्ता तत्र सटाक्षे-
पक्षिप्तनक्षत्रसंहतिः ॥४८३॥ प्राच्यां रक्ष प्रतीच्याञ्च

चण्डिके रक्ष दक्षिणे। भ्राणेनात्मशूलस्य उत्तरस्यां तथै-
श्वरि ॥४८४॥ यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः।
शक्तिः साप्यायययौ तत्र वाराहीं बिभ्रती तनुम् ॥४८५॥
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते। यानि
चात्यर्थघोराणि तैरक्षास्मांस्तथा भुवम् ॥४८६॥ तथैव
वैष्णवी शक्तिर्गरुडोपरि संस्थिता। शङ्खचक्रगदाशार्ङ्ग-
खड्गहस्ताभ्युपाययौ ॥ ४८७॥ खड्गशूलगदादीनि यानि
चास्त्राणि तेऽम्बिके। करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः

४८८॥ कौमारी शक्तिहस्ता च मयूरवरवाहना। योद्धु-
मभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥४८९॥ ऋषिरुवाच
॥४९०॥ माहेश्वरी वृषा रूढ़ा त्रिशूल वरधारिणी। महा-
हिवलया प्राप्ता चन्द्ररेखाविभूषणा ॥४९१॥ एवं स्तुता सुरै-
र्दिव्यैः कुसुमैर्नन्दनोद्भवैः। अर्चिता जगतां धात्री तथा
गन्धानुलेपनैः ॥४९२॥ हंसयुक्तविमानाग्रे साक्षसूत्रकमण-
डलुः। आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥४९३॥
भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तुधूपिता। प्राह प्रसादसु-
मुखी समस्तान्प्रणतान् सुरान् ॥४९४॥ यस्य देवस्य यद्रूपं

यथा भूषणवाहनम् । तद्वद्देवहितच्छक्तिरसुरान्योद्धुमाययौ
॥४९५॥ देव्युवाच ॥४९६॥ ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च
शक्तयः । शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः॥४९७॥ प्रति
व्रियतां त्रिदशाःसर्वे यदस्मत्तोऽभिवाञ्छितम् ॥४९८॥
एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् । भवायामरसिंहा- लोम
नामतिवीर्यबलान्विताः ॥४९९॥ देवाऊचुः ॥५००॥ तन्नि-
नादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् । देवीसिंहस्तथा काली दुर्गा
सरोषैः परिवारिताः ॥५०१॥ भगवत्या कृतं सर्वं न किंचिद-
वशिष्यते ॥५०२॥ धनुर्ज्यासिंहघंटानां नादापूरितदिङ्- ११२

मुखा। निनादैर्भीषणैः काली जिग्ये विस्तारिताननना
॥५०४॥ यदयन्निहतः शत्रुरस्माकम्महिषासुरः। यदि चापि
वरो देयस्त्वयास्माकं महेश्वरि ॥५०४॥ ततः सिंहो महा-
नादमतीवकृतवान् नृप। घण्टास्वनेन तन्नादमम्बिका
चोपबृंहयत् ॥५०५॥ संस्मृता संस्मृता त्वं नो हिंसेथा
परमापदः। यश्चमर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने
॥५०६॥ आयान्तञ्चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम्।
ज्यास्वनैः पूरयामास धरणीगगनान्तरम् ॥५०७॥ तस्य
वित्तर्द्धिविभवैर्द्धनदारादिसम्पदाम्। वृद्धयेऽस्मत्प्रसन्ना त्वं

प्रति
लोम
दुर्गा
११३
८

भवेथाःसर्वदाम्बिके ॥५०८॥ इत्याज्ञाप्यासुरपतिः शुम्भो
भैरवशासनः । निर्जगाम महासैन्यसहस्त्रैर्बहुभिर्वृतः॥५०९॥
ऋषिरुवाच ॥५१०॥ कालका दौर्हृदामौर्याः कालकेयास्त- प्रति
थासुराः । युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम
॥५११॥इति प्रसादिता देवैर्जगतोऽर्थे तथाऽऽत्मनः तथेत्यु- लोम
क्त्वा भद्रकाली बभूवान्तर्हिता नृप ॥५१२॥ कोटिवीर्याणि
पञ्चाशदसुराणां कुलानि वैं । शतं कुलानि धौम्राणां निर्ग- दुर्गा
च्छन्तु ममाज्ञया ॥५१३॥ इत्येतत्कथितं भूप सम्भूता सा
यथा पुरा । देवीदेवशरीरेभ्यो जगत्त्रयहितैषिणी ॥५१४॥ ११४

अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः । कम्बूनाञ्चतुरशी-
तिर्निर्यान्तु स्वबलैर्वृताः ॥५१५॥ पुनश्च गौरीदेहात्सा समुद्भूता
यथा भवत् । वधाय दुष्टदैत्यानां तथा शुम्भ निशुम्भयोः प्रति
॥५१६॥ ततः कोपपराधीनचेताश्शुम्भः प्रतापवान् । उद्योगं
सर्वसैन्यानां दैत्यानामादिदेश ह ॥५१७॥ रक्षणाय च लोम
लोकानां देवानामुपकारिणी । तच्छृणुष्व मयाऽऽख्यातं
यथावत् कथयामि ते ॥५१८॥ चण्डे च निहते दैत्ये मुण्डे च दुर्गा
विनिपातिते । बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥५१९॥ ११५
ॐ ऋषिरुवाच ॥५२०॥ ॐ क्ली ऋषिरुवाच ॥५२१॥ पुरा

शुम्भ निशुम्भाभ्यामसुराभ्यां शचीपतेः । त्रैलोक्यं यज्ञभा-
गाश्च हृता मदबलाश्रयात् ॥५२२॥ यस्माच्चण्डञ्च मुण्डञ्च-
गृहीत्वा त्वमुपागता । चामुण्डेति ततो लोके ख्याता देवि प्रति
भविष्यसि ॥५२३॥ तावेव सूर्यतान्तद्वदधिकारन्तथैन्दवम् ।
कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥५२४॥ तवानीतौ लोम
ततो दृष्ट्वा चण्डमुण्डौ महासुरौ । उवाच कालीं कल्याणी
ललितं चण्डिका वचः ॥५२५॥ तावेव पवनर्द्धिञ्च चक्रतु- दुर्गा
र्वह्निकर्मंच । ततो देवाविनिर्धूताभ्रष्टराज्याः पराजिताः
॥५२६॥ ऋषिरुवाच ॥५२७॥ हृताधिकारास्त्रिदशास्ताभ्यां

सर्वे निराकृताः । महासुराभ्यां तांदेवीं संस्मरन्त्यपराजि-
ताम् ॥५२८॥ मया तवात्रोपहृतौ चण्डमुण्डौ महापशू ।
युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि ॥५२९॥ तया-
स्माकं वरोदत्तो यथाऽऽपत्सुस्मृताखिलाः । भवतां नाशयि-
ष्यामि तत्क्षणात्परमापदः ॥५३०॥ शिरश्चण्डस्य काली
च गृहीत्वामुण्डमेव च । प्राह प्रचण्डाट्टहास मिश्रमभ्येत्य
चण्डिकाम् ॥५३१॥ इतिकृत्वामतिदेवा हिमवन्तं नगेश्वरम् ।
जग्मुस्तत्र ततोदेवीं विष्णुमायांप्रतुष्टुवुः ॥५३२॥ हतशेषं
ततः सैन्यं दृष्ट्वा चण्डं निपातितम् । मुण्डं च सुमहावीर्यं

प्रति लोम दुर्गा ११७

दिशोभेजेभयातुरम् ॥५३३॥ देवाऊचुः ॥५३४॥ अथ मुण्डो-
ऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम् । तमप्यपातयद्भूमौ
सा खड्गाभिहतं रुषा ॥५३५॥ नमो देव्यै महादेव्यै शिवायै
सततं नमः । नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्
॥५२६॥ उत्थाय च महासिंहं देवी चण्डमधावत । गृहीत्वा
चास्यकेशेषु शिरस्तेनासिनाच्छिनत् ॥५३७॥ रौद्रायै नमो
नित्यायै गौर्यै धात्यै नमोनमः । ज्योत्स्नायैचेन्दुरूपिण्यै
सुखायै सतततंनमः ॥५३८॥ ततो जहासातिरुषा भीमंभैरव-
नादिनी । कालीकरालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला ॥५३९॥

कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमोनमः । नैर्ऋत्यै
भूभृतांलक्ष्म्यै शर्वाण्यै ते नमोनमः ॥५४०॥ तानि चक्रा-
ण्यनेकानि विशमानानि तन्मुखम् बभुर्यथार्कबिम्बानि प्रति
सुबहूनि घनोदरं ॥५४१॥ दुर्गायै दुर्गपारायै सारायै सर्व-
कारिण्यै । ख्यात्यै तथैव कृष्णायै धूम्रायै सततन्नमः लोम
॥५४२॥ शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः । छादया-
मास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः ॥५४३॥ अतिसौम्याा- दुर्गा
तिरौद्रायै नतास्तस्यै नमोनमः । नमो जगत्प्रतिष्ठायै देव्यै
कृत्यै नमोनमः ॥५४४॥ क्षणेन तद्बलं सर्वमसुराणां ११६

निपातितम् । दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीष-
णाम् ॥५४५॥ या देवी सर्वभूतेषु विष्णुमायेति शब्दिता
नमस्तस्यै ॥५४६॥ असिनानिहताः केचित्केचित्खट्वाङ्गता- प्रति
डिताः । जग्मुर्विनाशमसुरा दन्ताग्राभिहतास्तथा ॥५४७॥
नमस्तस्यै ॥५४८॥ बलिनांतद्बलं सर्वमसुराणान्दुरात्मनाम् । लोन
ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा ॥५४९॥ नमस्तस्यै
नमोनमः ॥५५०॥ तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथा- दुर्गा
सुरैः । मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥५५१॥ या
देवी सर्वभूतेषु चेतनेत्यभिधीयते । नमस्तस्यै ॥५५२॥ १२०

एकं जग्राह केशेषु ग्रीवायामथ चापरम् । पादेनाक्रम्य
चैवान्यमुरसान्यमपोथयत् ॥५५३॥ नमस्तस्यै ॥५५४॥
तथैव योधं तुरगैरथं सारथिना सह । निक्षिप्य वक्त्रे दश-
नैश्चर्वयन्त्यतिभैरवम् ॥५५५॥ नमस्तस्यै नमोनमः ॥५५६॥
पार्ष्णिग्राहांकुशग्राहियोधघण्टासमन्वितान् । समादायैकह-
स्तेन मुखेचिक्षेपवारणान् ॥५५७॥ या देवी सर्वभूतेषु बुद्धि-
रूपेण संस्थिता ॥ नमस्तस्यै ॥५५८॥ सा वेगेनाभिपतिता
घातयन्ती महासुरान् । सैन्ये तत्र सुरारीणामभक्षयत् तद्-
बलम् ॥५५९॥ नमस्तस्यै ॥५६०॥ अतिविस्तारवदना जिह्वा-

ललन भीषणा । निमग्ना रक्तनयना नादापूरितदिङ्मुखा
॥५६१॥ नमस्तस्यै नमोनमः ॥५६२॥ विचित्रखट्वाङ्गधरा
नरमालाविभूषणा । द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा प्रति
॥५६३॥ या देवी सर्वभूतेषु निद्रारूपेण संस्थिता । नमस्त-
स्यै ॥५६४॥ भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् । लीम
काली करालवदना विनिष्क्रान्तासिपाशिनी ॥५६५॥ नम-
स्तस्यै ॥५६६॥ ततः कोपञ्चकारोच्चैरंबिका तानरीन्प्रति । दुर्गा
कोपेन चास्या वदनम्मषीवर्णमभूत्तदा ॥५६७॥ नमस्तस्यै
नमोनमः ॥५६८॥ ते दृष्ट्वा तां समादातुमुद्यमंचक्र रुद्यताः। १२२

आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ॥५६९॥ या देवी
सर्वभूतेषु क्षुधारूपेण संस्थिता ॥ नमस्तस्यै ॥५७०॥ ददृ-
शुस्ते ततो देवीमीषद्धासां व्यवस्थिताम् । सिंहस्योपरि प्रति
शैलेन्द्रश्रृंगे महति काञ्चने ॥५७१॥ नमस्तस्यै ॥५७२॥
आज्ञाप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः । चतुरंग लोम
बलोपेता ययुरभ्युद्यतायुधाः ॥५७३॥ नमस्तस्यै नमोनमः
॥५७४॥ ऋषिरुवाच॥५७५। या देवी सर्वभूतेषु च्छायारूपेण दुर्गा
संस्थिता । नमस्तस्यै ॥५७६॥ तस्यां हतायां दुष्टायां सिंहे
च विनिपातिते। शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथा-

म्बिकाम् ॥५७७। नमस्तस्यै ॥५७८॥ केशेष्वाकृष्य बद्ध्वा
वा यदि वः संशयो युधि। तदा शेषायुधैः सर्वैरसुरैर्विनिह-
न्यताम् ॥५७९॥ नमस्तस्यै नमोनमः ॥५८०॥ हे चण्ड हे
मुण्ड बलैर्बहुभिः परिवारितौ। तत्र गच्छत गत्वा च सा समा-
नीयतांलघु॥५८१॥ या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता।
नमस्तस्यै ॥५८२॥ चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिता-
धरः। आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ ॥५८३॥
नमस्तस्यै ॥५८४॥ श्रुत्वातमसुरं देव्या निहतं धूम्रलोच-
नम्। बलञ्च क्षयितं कृत्स्नं देवी केसरिणा ततः ॥५८५॥

नमस्तास्यै नमोनमः ॥५८६॥ क्षणेन तद्बलं सर्वं क्षयं नीतं
महात्मना । तेन केसरिणा देव्या वाहनेनातिकोपिना
॥५८७॥ या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ॥ नमस्त- प्रति
स्यै ॥५८८॥ विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे ।
पपौ च रुधिरं कोष्ठादन्येषान्धुतकेसरः ॥५८९॥ नम- लोम
स्तस्यै ॥५९०॥ केषञ्चित्पाटयामास नखैः कोष्ठानि
केसरी । तथा तलप्रहारेण शिरांसि कृतवान् पृथक् ॥५९१॥ दुर्गा
नमस्तस्यै नमोनमः ॥५९२॥ कांश्चित् करप्रहारेण दैत्याना-
स्येन चापरान् । आक्रम्य चाधरेणान्यान् स जघान महा-

सुरान् ॥५९३॥ या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ।

नमस्तस्यै ॥५९४॥ ततो धुतसटः कोपात्कृत्वा नादं सुभै-
रवम् । पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ॥५९५॥
नमस्तस्यै ॥५९६॥ अथ क्रुद्धं महासैन्यमसुराणां तथा- प्रति
म्बिका ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥५९७॥
नमस्तस्यै नमोनमः ॥५९८॥ इत्युक्तःसोऽभ्यधावत्तामसुरो लोम
धूम्रलोचनः । हुङ्कारेणैव तंभस्म सा चकाराम्बिका ततः
॥५९९॥ या देवी सर्वभूतेषु जातिरूपेण संस्थिता । नम- दुर्गा
स्तस्यै ॥६००॥ ऋषिरुवाच ॥६०१॥ नमस्तस्यै ॥६०२॥
दैत्येश्वरेण प्रहितो बलवान् बलसवृतः । बलान्नयसि मामेवं १२६

ततः किन्ते करोम्यहम् ।६०३॥ नमस्तस्यै नमोनमः
॥६०४॥ देव्युवाच ॥६०५॥ या देवी सर्वभूतेषु लज्जारूपेण
संस्थिता । नमस्तस्यै ॥६०६॥ न चेत्प्रीत्याद्य भवती मद्भ-
र्तारमुपैष्यति । ततोबलान्नयाम्येष केशाकर्षणविह्वलाम्
॥६०७॥ नमस्तस्यै ॥६०८॥ स दृष्ट्वा तां ततो देवी तुहि-
नाचलसंस्थिताम् । जगादोच्चैः प्रयाहीति मूलं शुम्भनिशु-
म्भयोः ॥६०९॥ नमस्तस्यै नमोनमः ॥६१०॥ तेनज्ञास-
स्ततः शीघ्रं स दैत्यो धूम्रलोचनः । वृतः षष्ट्या सहस्रा-
णामसुराणां द्रुतंययौ ॥६११॥ या देवी सर्वभूतेषु शान्ति-

रूपेण संस्थिता। नमस्तस्यै ॥६१२॥ ऋषिरुवाच ॥६१३॥
नमस्तस्यै ॥६१४॥ तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठतेऽपरः।
स हन्तव्योऽमरोवापि यक्षो गन्धर्व एव वा ॥६१५॥ नमस्तस्यै
नमोनमः ॥६१६॥ हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः।
तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम् ॥६१७॥ या देवी
सर्वभूतेषु श्रद्धारूपेण संस्थिता। नमस्तस्यै ॥६१८॥ तस्य
दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः। सक्रोधः प्राह दैत्या-
नामधिपं धूम्रलोचनम् ॥६१९॥ नमस्तस्यै ॥६२०॥ इत्या-
कर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः। समाचष्ट समा

गम्य दैत्यराजाय विस्तरात् ॥६२१॥ नमस्तस्यै नमोनमः ॥६२२॥ ऋषिरुवाच ॥६२३॥ या देवी सर्वभूतेषु कान्ति-रूपेण संस्थिता। नमस्तस्यै ॥६२४॥ स त्वं गच्छ मयो-क्तन्ते यदेतत्सर्वमाहृतः। तदाचक्ष्वाऽसुरेन्द्राय स च युक्तं-करोतु तत् ॥६२५॥ नमस्तस्यै॥६२६॥ एवमेतद्बली शुम्भो निशुम्भश्चातिवीर्यवान्। किङ्करोमि प्रतिज्ञा मे यदना-लोचिता पुरा ॥६२७॥ नमस्तस्यै नमोनमः ॥६२८॥ देव्यु-वाच ॥६२९॥ या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता। नमस्तस्यै ॥६३०॥ सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भ निशुम्भयोः। केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि

प्रति

लोम

दुर्गा

१२६

।६३१। नमस्तस्यै ।६३२। इन्द्राद्याःसकला देवास्तस्थु-
र्येषां न संयुगे । शुम्भादीनां कथन्तेषां स्त्री प्रयास्यसि
सम्मुखम् ।६३३। नमस्तस्यै नमोनमः ।६३४। अन्येषा-
मपि दैत्यानां सर्वे देवा नवै युधि । तिष्ठन्ति सम्मुखे देवि
किं पुनः स्त्री त्वमेकिका ।६३५। या देवी सर्वभूतेषु वृत्ति-
रूपेण संस्थिता । नमस्तस्यै ॥३३६॥ अवलिप्तासि मैवं
त्वं देवि ब्रूहि ममाग्रतः । त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुम्भ
निशुम्भयोः ॥६३७॥ नमस्तस्यै ॥६३८॥ दूत उवाच
।६३९। नमस्तस्यै नमोनमः ॥६४०॥ तदागच्छतु शुम्भो-
ऽत्र निशुम्भो वा महासुरः । मां जित्वा किं चिरेणात्र पाणिं

गृह्णातु मे लघु ॥६४१॥ या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता। नमस्तस्यै ॥६४२॥ यो मां जयति संग्रामे यो मे दर्पं व्यपोहति। यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ॥६४३॥ नमस्तस्यै ॥६४४॥ किन्त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथम् श्रूयतामल्पबुद्धि-त्वात्प्रतिज्ञा या कृतापुरा ॥६४५॥ नमस्तस्यै नमोनमः ॥६४६॥ सत्यमुक्तं त्वया नात्र मिथ्या किञ्चित्त्वयोदितम्। त्रैलोक्याधिपतिः शुम्भो निशुम्भश्चापि तादृशः ॥६४७॥ या देवी सर्वभूतेषु दयारूपेण संस्थिता। नमस्तस्यै ॥६४८॥ देव्युवाच ॥६४९॥ नमस्तयै ॥६५०॥ इत्युक्ता सा तदा

देवी गम्भीरान्तःस्मिता जगौ । दुर्गा भगवती भद्रा ययेदं
धार्यते जगत् ॥६५१॥ नमस्तस्यै नमोनमः ॥६५२॥ ऋषि-
रुवाच ॥६५३। या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता । प्रति
नमस्तस्यै ॥६५४॥ परमैश्वर्यमतुलम्प्राप्स्यतेमत्परिग्रहात् ।
एतद्बुद्ध्या समालोच्य मत्परिग्रहतां ब्रज ॥६५५॥ नम-
स्तस्यै ॥६५६॥ मां वा ममानुजं वापि निशुम्भमुरुविक्र- लोम
मम् । भजत्वंचञ्चलापाङ्गि रत्नभूतासि वै यतः ॥६५७॥
नमस्तस्यै नमोनमः ॥६५८॥ स्त्री रत्नभूता त्वां देवि लोके दुर्गा
मन्यामहे वयम् । सात्वमस्मानुपागच्छ यतो रत्नभुजो
वयम् ॥६५९॥ या देवी सर्वभूतेषु मातृरूपेण संस्थिता । १३२

नमस्तस्य ॥६६०॥ यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च।
रत्नभूतानि भूतानि तानि मय्येव शोभने ॥६६१॥ नमस्त-
स्यै॥६६२॥ क्षीरोदमथनोद्भूतमश्वरत्नम्ममामरैः । उच्चैश्श्र-
वससंज्ञं तत्प्रणिपत्य समर्पितम् ॥६६३॥ नमस्तस्यै नमो-
नमः ॥६६४॥ त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ।
तथैव गजरत्नं च हृत्वा देवेन्द्रवाहनम् ॥६६५॥ या देवी
सर्वभूतेषु भ्रान्तिरूपेण संस्थिता । नमस्तस्यै ॥६६६॥ मम
त्रैलोक्यमखि म देवा वशानुगाः । यज्ञभागानहं सर्वा-
नुपाश्नामि पृथक् पृथक् ॥६६७॥ नमस्तस्यै ॥६६८॥
अव्याहताज्ञः सर्वासु यः यदा देवयोनिषु । निर्जिताखिल-

दैत्यारिः स यदाह शृणुष्व तत् ॥६६९॥ नमस्तस्यै नमो-
नमः ॥६७०॥ देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः ।
दूतोऽहम्प्रेषितस्तेन त्वत्सकाशमिहागतः ॥६७१॥ इन्द्रिया- प्रति
णामधिष्ठात्री भूतानांचाखिलेषु या । भूतेषु सततं तस्यै
व्याप्तिदेव्यै नमोनमः॥६७२॥ देव्युवाच॥६७३॥ चितिरूपेण लोम
याकृत्स्नमेतद्व्याप्यस्थिता जगत् । नमस्तस्यै ॥६७४॥ स
तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने। सा देवी तान्ततः
प्राह श्लक्ष्णंमधुरया गिरा ॥६७५॥ नमस्तस्यै ॥६७६॥ इति दुर्गा
चेति च वक्तव्या सागत्वा वचनान्मम । यथा चाभ्येति
सम्प्रीत्या तथा कार्यं त्वया लघु ॥६७७॥ नमस्तस्यै नमो- १३४

नमः ॥६७८॥ निशम्येति वचः शुम्भः स तदा चण्ड-
मुण्डयोः । प्रेषयामास सुग्रीवं दूतं दे०। महासुरम् ॥६७९॥
स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथासुरेन्द्रेण दिनेषु सेविता ।
करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहन्तु चापदः
॥६८०॥ ऋषिरुवाच ॥६८१॥ या साम्प्रतंचोद्धतदैत्यता-
पितैरस्माभिरीशा च सुरैर्नमस्यते ॥ या च स्मृता तत्क्षण-
मेव हन्ति नः सर्वापदो भक्तिविनम्रमूर्तिभिः ॥६८२॥ एवं
दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते। स्त्रीरत्नमेषा कल्याणी
त्वया कस्मान्न गृह्यते ॥६८३॥ ऋषिरुवाच ॥६८४॥ निशु-

म्भस्याब्धिजाताश्च समस्ता रत्नजातयः । वह्निरपि ददौ

तुभ्यमग्निशौचे च वाससी ॥६८५॥ एवं स्तवादियुक्तानां
देवानान्तत्र पार्वती। स्नातुमभ्याययौ तोये जाह्नव्या
नृपनन्दन ॥६८६॥ मृत्योरुत्क्रान्तिदा नाम शक्तिरीशत्वया
हृता। पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥६८७॥ प्रति
साब्रवीत्तान् सुरान् सुभ्रूर्भवद्भिः स्तूयतेऽत्र का। शरीर-
कोशतश्चास्याः समुद्भूताब्रवीच्छिवा ॥६८८॥ छत्रन्ते वारु- लोम
णङ्गृहे काञ्चनश्चावि तिष्ठति। तथायं स्यन्दनवरो यः पुरा-
ऽऽसीत्प्रजापतेः ॥६८९॥ स्तोत्रम्ममैतत् क्रियते शुम्भदैत्य- दुर्गा
निराकृतैः। देवैःसमेतेसमरे निशुम्भेन पराजितैः ॥६९०॥
निधिरेष महापद्मः समानीतो धनेश्वरात्। किंजल्किनीं १३६

ददौ चाब्धिर्मालामम्लानपङ्कजाम् ॥६९१॥ शरीरकोशा-
द्यत्तस्याः पार्वत्या निःसृताम्बिका । कौशिकीति समस्तेषु
ततो लोकेषु गीयते ॥६९२॥ विमानं हंससंयुक्तमेतत्तिष्ठति प्रति
तेऽङ्गणे । रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतम् ॥६९३॥
तस्यां विनिर्गतायांत्तु कृष्णाभूत्सापि पार्वती । कालिके- लोम
तिसमाख्याता हिमाचलकृताश्रया ॥६९४॥ ऐरावतः समा-
नीतो गजरत्नं पुरन्दरात् । पारिजाततरुश्चायं तथैवोच्चैः
श्रवाहयः ॥६९५॥ ततोऽम्बिकां परं रूपम्बिभ्राणां सुमनो- दुर्गा
हरम् । ददर्शचण्डो मुण्डश्च भृत्यौ शुम्भ निशुम्भयोः
॥६९६॥ यानिरत्नानि मणयो गजाश्वादीनि वै प्रभो ।

त्रैलोक्ये तु समस्तानि साम्प्रतं भान्ति ते गृहे ॥६९७॥
ताभ्यां शुम्भाय चाख्याता अतीव सुमनोहरा । काप्यास्ते
स्त्री महाराज भासयन्ती हिमाचलम् ॥६९८॥ स्त्रीरत्नमति- प्रति
चार्वङ्गी द्योतयन्ती दिशास्त्विषा । सा तु तिष्ठति दैत्येन्द्र
तांभवान्द्रष्टु मर्हति ॥६९९॥ नैव तादृक् क्वचिद्रूपं दृष्टं लोम
केनचिदुत्तमम् । ज्ञायतां काप्यसौ देवी गृह्यतां चासुरे-
श्वर ॥७००॥ दुर्गा

ॐ तत्सत् मार्कण्डेय पुराणे सावर्णिके मन्वन्तरे देवी
माहात्म्ये अध्याय देवतायै नमोनमः ॥

अक्षर न्यासं कुर्यात्, ध्यानपूर्वक देवीसूक्तं पठेत् ॥
अष्टोत्तरशतं नवार्णमन्त्रं जपेत् । रहस्य त्रयं पठेत् ॥

॥ हवन समये कवचा हुति निषेधः ॥

तत्र सप्तशतीमध्ये कवच पञ्चदशामन्त्रः प्रमाणेदुर्गोपाशनाकल्पद्रुमेषु ॥ १६० मन्त्रकाउत्तरार्ध १९२-१६४-१६६-१६८-१७० मन्त्रकापूर्वार्ध पुनः १९५-१९६-१९७-१९९ पुनः २०१-२०३ पुनः ४८२-४८४-४८६-४८८ ॥

॥ मन्त्र कवच है अतः इन मन्त्रों पर आहुति देना महा अरिष्ट है ॥

इति मन्त्र प्रतिलोमपाठः

* देव्यपराधक्षमापन स्तोत्रम् *

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो, न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः । न जाने मुद्रास्ते तदपि च न जाने विलपनं, परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥१॥ विधेरज्ञानेन द्रविणविरहेणालसतया, विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् । तदेतत्क्षन्तव्यं जननि सकलोद्धारिणि शिवे, कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥२॥ पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः, परं तेषां मध्ये विरलतरलोऽहं तव सुतः । मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे, कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥३॥ जगन्मातर्मातस्तव चरणसेवा न रचिता, न वा दत्तं देवि द्रविणमपि भूयस्तव मया । तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे, कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥४॥ परि-

त्यक्ता देवाविविध सेवाकुलतया, मया पञ्चाशीतेरधिकमपनीते तु
वयसि । इदानीं चेन्मातस्तव यदि कृपा नापि भविता, निरालम्बो लम्बो-
दरजननि कं यामि शरणम् ॥५॥ श्वपाको जल्पाको भवति मधुपाकोपम-
गिरा, निरातङ्को रङ्को विहरति चिरं कोटिकनकैः तवापर्णे कर्णे विशति प्रति
मनुवर्णे फलमिदं, जनः को जानीते जननि जपनीयं जपविधौ ॥६॥ चिता-
भस्मालेपो गरलमशनं दिक्पटधरो, जटाधारी कण्ठे भुजगपतिहारी पशु- लोम
पतिः । कपाली भूतेशो भजति जगदीशैकपदवीं, भवानि त्वत्पाणिग्रहण-
परिपाटीफलमिदम् ॥७॥ न मोक्षस्याकांक्षा भवविभववाञ्छापि च न मे, न
विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः । अतस्त्वां संयाचे जननि दुर्गा
जननं यातु मम वै, मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥८॥
नाराधितासि विधिना विविधोपचारैः, किं रूक्षचिन्तनपरैर्न कृतं वचोभिः

श्यामे त्वमेव यदि किञ्चन मय्यनाथे, धत्से कृपामुचितमम्ब परं तवैव ॥९।

आपत्सु मग्नः स्मरणं त्वदीयं, करोमि दुर्गे करुणार्णवेशि । नैतच्छठत्वं मम भावयेथाः, क्षुधातृषार्ता जननीं स्मरन्ति ॥१०॥ जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि । अपराधपरम्परापरम न हि माता समुपेक्षते सुतम् ॥११॥ मत्समः पातकी नास्ति पापघ्नी त्वत्समा नहिं । एवं ज्ञात्वा महादेवि यथा योग्यं तथा कुरु ॥१२॥

* भवान्यष्टकम् *

न तातो न माता न बन्धुर्न दाता, न पुत्रो न पुत्री न भृत्यो न भर्ता ।
न जाया न विद्या न वृत्तिर्ममैव, गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥१॥
भवाब्धावपारे महादुःखभीरु । पपात प्रकामी प्रलोभी प्रमत्तः ।
कुसंसारपाशप्रबद्धः सदाहम् । गतिस्त्वं० ॥२॥
न जानामि दानं न च ध्यानयोगं, न जानामि तन्त्रं न च स्तोत्रमन्त्रम् ।

न जानामि पूजां न च न्यासयोगम् । गतिस्त्वं० ॥३॥

न जानामि पुण्यं न जानामि तीर्थं, न जानामि मुक्तिं लयं वा कदाचित् ।
न जानामि भक्तिं व्रतं वापि मातर्गतिस्त्वं० ॥४॥

कुकर्मी कुसङ्गी कुबुद्धिः कुदासः, कुलाचारहीनः कदाचारलीनः । प्रति
कुदृष्टिः कुवाक्यप्रबन्धः सदाहम् । गतिस्त्वं० ॥५॥

प्रजेशं रमेशं महेशं सुरेशं, दिनेशं निशीथेश्वरं वा कदाचित् । लोम
न जानामि चान्यत् सदाहं शरण्ये । गतिस्त्वं० ॥६॥

विवादे विषादे प्रमादे प्रवा[illegible] चानले पर्वते शत्रुमध्ये । दुर्गा
अरण्ये श[illegible]दा मां प्रपाहि । गतिस्त्वं० ॥७॥

अनाथो दरिद्रो जरारोगयुक्तो, म[illegible]क्षीणदीनः सदा जाड्यवक्त्रः ।
विपत्तौ प्रविष्टः प्रणष्टः सदाहम् । गतिस्त्वं० ॥८॥

॥ इति श्रीमच्छङ्कराचार्यकृतं भवान्यष्टकं सम्पूर्णम् ॥

आरती श्री दुर्गाजी की

जै अम्वे गौरी मैया जै मंगल मूर्ती मैया जै आन [illegible]।

[illegible] शदिन ध्यावत हर ब्रह्मा शिवरी ॥टेर॥

मांग सिन्दूर विराजत टीका मृग म [illegible] से दोउ नैना चन्द्र बदन नीको ॥ जै० ॥१॥

कनक समान कलेवर रक्ताम्बर [illegible] ष्प वनमाला कंठन पर साजै ॥ जै० ॥२॥

केहरि वा [illegible] राजत खड्ग खप्र [illegible] सुर नर मुनिजन सेवित तिनके दुखहारी ॥ जै० ॥३॥

कानन कुण्डल शोभित नासाग्रे मोती । कोटिक चन्द्र दिवाकर राजत सम ज्योती ॥ जै०॥४॥

निशुम्भ विदारे महिषासुर घाती । धूम्र विलोचन नैना निश दिन मदमाती ॥ जै० ॥५॥

चौसठ योगिनीं गावत नृत्य करत भैरू । गावत ताल मृदंगा और व जत डमरू ॥ जै० ॥६॥

भुजा चार अति शोभित खड्ग खप्रधारी । मन वांछित फल पावत सेवत नर-नारी ॥ जै० ॥७॥

कंचन थाल विराजत अगर कपूर की वाती । श्रीमाल केतु में राजत कोटि रतन ज्योती ॥ जै० ॥८॥

दोहा—या अम्वे जी की आरती, जो कोई नर गावै ।
[illegible]नत शिवानन्द स्वामी, सुख सम्पति पावै ॥

नास्ति [illegible] ॥१२॥

प्रति लोम दुर्गा १४४